# यज्ञमधुसूदन तथा अर्थसंग्रहः

**आचार्य द्वितीय-सत्रार्ध्द छात्राणां कृते ।**

चतुर्थ-प्रश्नपत्रम्

# १.प्लक्षस्य  गुणाः यज्ञमधुसूदनानुसारेण लिखत।

### प्लक्षस्य गुणाः।

प्लक्षः कषायकटुकः शिशिरो योनिरोगहृत् ॥
रक्तदोषं रक्तपित्तं दाहं शोफं व्रणं हरेत् ॥1॥
मूर्च्छाभ्रमप्रलापांश्च ह्रस्वपत्रो विशेषतः ॥

# २.यज्ञीयवृक्षाणां नामानि गुणाश्च लिखत।

## यज्ञियवृक्षाः

पलाशः खदिरः प्लक्षो बटोऽश्वत्थ उदुम्बरः ॥
कृमुको वरणो बिल्वः शमीगर्भो विकङ्कतः ॥1॥
काष्मर्य्यः सरलः सालो देवदारुश्च चन्दनः ॥
इमे यज्ञद्रुमा यज्ञे तत्काष्ठैः पात्रनिर्म्मितिः ॥2॥
रसवीर्य्यविपाकेभ्यो मूलात् पुष्पात् फलाद्दलात् ॥
आकाराद्देशकालादेर्वनौषध्यर्थमुन्नयेत् ॥3॥
एतेषामभिधा रूढ़ा यौगिका दैशिका अपि ॥
निर्द्दिश्यन्ते क्रमात्तद्वद्गुणाः पश्चाङ्गसंगताः ॥4॥

# 3.यज्ञे निषिद्धवृक्षाणां नामानि लिखत।

## निषिद्धवृक्षाः

*अथ निषिद्धा वृक्षा अपि स्मर्यन्ते गोभिलादिभिः–*

*विभीतकः, कोविदारो, नीपतिल्वकबाधकाः ॥*

*श्लेष्मन्तकोऽरलुर्निम्बो राजवृक्षश्च शाल्मली ॥1॥*

*दधित्थ इत्यमी वृक्षा निन्दिता यज्ञकर्म्मणि ॥*

*अनिषिद्धा मध्यमाः स्युर्मुख्यालाभे ततो विधिः ॥2॥*

# 4.देवदारुवृक्षस्य गुणाः लिखत

देवदारुगुणाः ।

देवदारु लघुस्निग्धं तिक्तोष्णं कटुपाकि च॥
रूक्षमं श्लेष्मानिलध्वंसि भूतदोषविनाशकृत् ॥1॥
विबन्धाध्मानशोथामन्द्राहिक्काज्वरापहम् ॥
प्रमेहपीनसश्लेष्मश्वासकासास्रनाशकृत् ॥2॥
आमदोषविबन्धार्शःप्रमेहज्वरनाशनः ॥
अलक्ष्मी रूक्षत्तां हन्ति रक्षो विघ्नविनाशकृत् ॥3॥

# 5.मन्थन-पात्रणां नामानि लिखत।

### मन्थनपात्राणि

अधरारणिः, उत्तरारणिः, देवयोनिः, प्रमन्थः, चात्रम्, ओविलो, नेत्रम्,
धिमन्थनशकलः—इत्यग्निमन्थनयन्त्रावयवद्रव्याणि।

# 6.दशायुधस्य नामानि लिखत।

## आयुधानि

स्फ्यम् कपालानि च; शूर्पम्, अग्निहोत्रहवणी च; शम्या, कृष्णाजिनं च; उलूखलं, मूसलं च; दृषद्, उपलं चेत्येतानि दशपात्राणि यज्ञायुधसंज्ञकानि भवन्ति। दर्शपूर्णमासस्य युद्धरूपत्वात्, तत्र चैषां प्राधान्येनोपयोगात्॥

# 7.के दश चमसाः?

**चमसाः 10**

यजमानचमसः, ब्रह्मचमसः, होतृचमसः, उद्गातृचमसः, आग्निध्रचमसः, प्रशास्तृचमसः, पोतृचमसः, नेष्टृचमसः, अच्छावाकचमसः, व्रतशंसेचमसः; इत्येतानि चमसपात्राणि दश॥

पलाशमया: वटमया अन्यकाष्ठमया

# ८. प्रणिता-प्रोक्षणी पात्रयोःस्वरूपं लिखत।

## प्रणीतापात्रम्

प्रणीता प्रणयनम्, आश्वत्थं वारणं वा प्रादेशमात्रमष्टांगुलबिलं चतुरंगलदण्डं पात्रम्। तेन प्रणीतानाम्न्य आपो नीयन्ते। "प्रस्थमात्रोदकग्राही प्रणीता चमसो भवेदि" त्याहुः॥

## प्रोक्षणीपात्रम्

अथ प्रोक्षणीपात्रम्। पाणिमात्रं बैकङ्कतं हंसमुखप्रसेकं त्वग्बिलं चतुरंगुलं च कार्य्यम्॥

# 9.पञ्चस्त्रुक् पात्राणां नामानि लिखत।

**स्रुचः ॥5॥**

स्रुवः, ध्रुवा, जुहूः, उपभृत्, अग्निहोत्रहवणी इत्येतानि पञ्च स्रुक्संज्ञकानि पात्राणि।

# 10.श्रुतिलक्षणं प्रतिपादयत।

## (५६) श्रुत्यादिषट्प्रमाणानि श्रुतिलक्षणञ्च

तत्र षट्प्रमाणानि श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि। तत्र क्रमपरवचनं श्रुतिः। तच्च द्विविधम्। केवलक्रमपरं तद्विशिष्टपदार्थपरं चेति। तत्र 'वेदं कृत्वा वेदिं करोती'ति केवलक्रमपरम्। वेदिकरणादेर्वचनान्तरप्राप्तत्वात्। 'वषट्कर्त्तुः प्रथमभक्ष' इति तु क्रमविशिष्टपदार्थपरम्। एकप्रसरताभङ्गभयेन भक्षानुवादेन क्रममात्रस्य विधातुमशक्यत्वात्।।५६।।

# 11.साद्यस्क्र- यागस्य वर्णनं क्रीयताम्।

## (६५) साद्यस्क्रयागः

तथाहि ज्योतिष्टोमे त्रयः पशुयागाः । अग्नीषोमीयः सवनीय आनुबन्ध्यश्चेति । ते च भिन्नदेशाः । अग्नीषोमीय औपवसथ्येऽह्नि । सवनीयः सुत्याकाले । आनुबन्ध्यस्त्वन्ते । साद्यस्क्रो नाम सोमयाग-विशेषः । स चाव्यक्तत्वाद् ज्योतिष्टोमविकारः । अतस्ते त्रयोऽपि पशुयागाः साद्यस्क्रे चोदकप्राप्ताः । तेषां च तत्र साहित्यं श्रुतं 'सह पशूनालभेत' इति । तच्च साहित्यं सवनीयदेशे । तस्य प्रधान-प्रत्यासत्तेः । स्थानातिक्रमसाम्याच्च ।।६५।।

# १४.पञ्चस्त्रुक् पात्राणां प्रतिपादनं क्रीयताम्।

## स्रुवः

खादिरोऽग्रभागेऽङ्गुष्ठपर्वमात्रवर्त्तुलबिलयुक्तपुष्करोऽरत्निमात्रदीर्घा बाहुमात्रेः वा खातेन हस्ततलवदाकृत्या पद्यमपत्रवत् स्रुवःकार्य्यः। अत्राहुः–

अरत्निमात्रो हंसास्यो वर्त्तुलोऽङ्गुष्ठपर्ववत्।

अर्द्धपर्वप्रणाल्या च युक्तो नासाकृतिर्भवेत्।इति॥

वैकङ्कत स्रुवोऽप्यस्यैव भेदः। आज्यादिद्रव्यमस्मात् स्रवति तस्मात् स्रुवः॥1॥

## ध्रुवा

वैकङ्कती जुहूसद्दशी ध्रुवा क्रियते। साहि होमाद्यर्थं स्रुवेण गृह्यमाणस्याज्यस्याऽऽधारभूता यागसमाप्तिं यावदेकत्र वेद्यां स्थिरा भवति तस्माद् ध्रुवा॥2॥

## जुहूः

पालाशी चाग्निहोत्रहवणीसदृशाकारा जुहूः क्रियते। हूयतेऽनया, तस्माज्जुहूः। 'पुष्करस्रुगि' त्यस्या एव भेद इत्याहुः॥3॥

## उपभृत्

आश्वत्थी जुहूतल्या चोपभृत् क्रियते। चतुर्विंशत्यंगुलदण्डा हंसमुखी पर्वखाता च। जुह्वाः समीपे ध्रियते तस्मादुपभृत्॥4॥

## अग्निहोत्रहवणी

वैकङ्कती त्वग्निहोत्रहवणी प्रागेवोपदर्शिता॥5॥

सर्वाश्चैताः स्रुचो मूलदण्डा हंसमुखप्रसेकास्त्वग्बिलाः पाणिमात्रपुष्करा बाहुमात्र्यः क्रियन्ते। अन्येऽप्येवं स्रुवभेदा भवन्ति–वर्त्तुलास्याः, शंकुमुखाः, पर्वखाताः, समानाश्चेति सामान्यो धर्म्मः।

इति पञ्चस्रुक् पात्राणि॥

# धन्यवादः

- डॉ धर्मेन्द्रकुमारपाठकः
- जयपुर-परिसरः